ध्यानमनुष्ठानं तेनोपहतास्तनवः अथवा सम्यग्ज्ञानमविद्यायाः प्रतिपक्षः, भेददर्शनरक्षिकाया, माध्यस्थ्यं रागद्वेषयोः, अनुकम्पा बुद्धिनिवृत्तिरभिनिवेशस्येति । विच्छित्तिमाह तथेति । क्लेशानामन्यतमेन समुदाचरताऽभिभवाद्वाऽत्यन्तविषयसेवया वा विच्छिन्नविच्छिन्ना तेन तेनात्मना समुदाचरन्ति आविर्भवन्ति बीजोन्मूलनाद्युपयोगेन वाभिभावकदौर्बल्येन वेति । वीप्सया च विच्छेदसमुदाचारयोः पौनःपुन्यं दर्शयता यथाज्ञात् प्रसुप्तात् भेद उक्तः । रागेण वा समुदाचरता विजातीयः क्रोधोऽभिभूयते सजातीयेन वा विषयान्तरवर्त्तिना रागेणैव विषयान्तरवर्त्ती रागोऽभिभूयत इत्याह रागेति भविष्यद्ग्रहणेनास्यापि गतिः यथायोगवेदितव्येत्याह । सहीति सविग्रहक्लेशमात्रपरामर्शि सर्वनाम । न चैतद्रागपरामर्शि तस्य विच्छिन्नत्वादेवेति । उदारमाह विषय इति । ननु उदार एव पुरुषान् क्लिश्नातीति भवतु क्लेशो अन्ये त्वक्षमनः कथं क्लेशा ? इत्यत आह । सर्व एवैते इति क्लेशविषयत्वं क्लेशपदवाच्यत्वं नातिक्रामन्ति उदारतामापद्यमानाः अतएव तेऽपि हेया इति भावः । क्लेशत्वेनैकतां मन्यमानस्योदयति कस्तर्हि ? इति । क्लेशत्वेन समानत्वेऽपि यथोक्तावस्थाभेदाद्विशेष इति परिहरति उच्यते सत्यमिति स्यादेतदविद्यातो भवन्तु क्लेशाः, तथाप्यविद्यानिवृत्तौ कस्माद्विवर्त्तन्ते ? न खलु पटः कुविन्दनिवृत्तौ निवर्त्तते इत्यत आह सर्व एवेति भेदा इव भेदास्तदविनिर्भागवर्त्तिन इति यावत् कस्मात् ? इति प्रश्नः । उत्तरं सर्वेष्वेति तदेव स्फुटयति यदिति आकार्य्यते समारोप्यते शेषं सुगमम् "प्रसुप्तास्तत्त्वलीनानां तन्ववस्थाश्च योगिनाम् । विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनामिति" संग्रहः" विव० । "क्लेशप्रहाणमिह लब्धसबीजयोगाः" "क्लेशकर्मफलभोगवर्ज्जितम्" माघः । "दाशरथ्योः क्षणक्लेशः" रघुः "क्लेशः फलेन हि पुनर्नवतां विधत्ते" कुमा० "यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्" मनुः । "तत्राजगनिरोधास्तु जननीक्लेशकारिणः" माघः २क्रोधे ३व्यवसाये मेदि० । तयोरपि तद्धेतुत्वात्तथात्वम् । "अद्ये क्लेशतमसोः" पा० हन्तेःड । क्लेशापहः पुत्र

**क्लेशक** त्रि० क्लिश-वुञ् । क्लेशशीले "ण्वुला सिद्धे वुञ्विधानं ताच्छीलिकादिषु वासरूपन्यायेन तृजादयो न" सि० कौ० । तेन क्लेशितेत्यादि असाधु । कर्त्तरि णिनिस्तु भवत्येव । "निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीम्" माघः ताच्छील्ये इत्युक्तेः कर्त्तरि तृच् भवत्येव. तेन "विद्वांस्तथैव यः शक्तः क्लिश्यमानो न कुप्यति । अनाशयित्वा क्लेशारं परलोके च नन्दति" भा०व० २९अ०

**क्लैतकिक** न० क्लीतकेन निर्वृत्तम् ठञ् । मद्ये शब्दचन्द्रिका।

**क्लोमन्** न० क्लु गतौ मनिन् । हृदयस्याधोभागे दक्षिणकुक्षिस्थे मांसपिण्डाकारे पदार्थे "तस्याधोवामतः प्लीहा फुस्फुसश्च दक्षिणतो यकृत् क्लोम" सुश्रुतः । "वपावसावहननं नाभिः क्लोम यकृत् प्लिहा" या० । अवहननं फुप्फुसः प्लीहा आयुर्वेदप्रसिद्धः तौ च मांसपिण्डाकारौ सव्यकुक्षिगतौ । यकृत् कालकं, क्लोम मांसपिण्डस्तौ च दक्षिणकुक्षिगतौ" मिता० । "वृक्कयोः प्लीह्नि यकृति हृदये क्लोम्नि वा तथा । श्वासो यकृति तृष्णा च पिपासा क्लोमजेऽधिका । नाभीपृष्ठहृदय क्लोमनिबद्धास्त्वष्टादश" "कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः" शुष्कक्लोमगलाननः" इति च सुश्रुतः । सर्व्वे नाम्ना अदन्ताः स्युरित्युक्तेः क्लोममप्यत्र भरतः । क्लोम च पिपासास्थानमिति वैद्यकम् । अतएव सुश्रुते पिपासा क्लोमजेऽधिका इत्युक्तम् "निष्कुतील्व क्लोम" दशकुमा० "वल्मीकान् क्लोमभिः" यजु० २५,८,अस्य पुंस्त्वमपि । "यकृत् क्लोमानं वरुणोभिषज्यन्" यजु० १९,८५

**क्लोश** पु० क्रोश+रस्य लः । भये । "सिन्धुरिव प्रवण आशुया यतो यदि क्लोशमनुष्वनि" ऋ० ६,४६,१४, क्लोशेति भयनाम" भा०

**क्व** अ० किम्+अ किमः कुः । कस्मिन्नित्यर्थे "क्वे द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः" सा०द० "स्थायं स्थायं क्वचिद्वान्तं क्रान्त्वा च क्रान्त्वाऽऽस्थितं क्वचित्" भट्टिः क्वशब्दौ स्वार्थान्वितयोर्महदन्तरं सूचयतः । "क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः" रघुः । सूर्य्यवंशकविप्रज्ञयोर्विषयविषयिभावोऽत्यन्तासम्भवीति गम्यते । एवमन्यत्रापि यथायथमूहम् । ततो भवार्थे त्यप् त्यक् वा क्वत्य कस्मिन् भवे अर्थे त्रि० । ततः स्वार्थे क टापि । क्वत्यिका । मुग्धबोधमते अस्मात् चिच्चनौ क्वचित् क्वचन । "क्वचित् क्वचित् विवरणे गूढभावः प्रकाश्यते" विवरणटीका । "क्वचन पतनयोग्यं देशमन्विष्य तावः" नैष० । अपरमते द्वे पदे इति भेदः तयोः समासे कादाचित्कपदसिद्धिः

**क्वङ्गु** पु० कु+अगि उन् । कङ्गौ(काङ्नी) धान्यभेदे हेमच०

**क्वण** अव्यक्तशब्दे भ्वा० पर० अक० सेट् । क्वणति अक्वाणीत्-अक्वणीत् चक्वाण । उदा० क्वणः क्वाणः । क्वणितम् ।